दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लद्वितीया
फाल्गुण 07 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-119 | 1 | फरवरी 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 ए.आई. शिखरसम्मेलने वेब्स-क्रियेटरस् कॉर्नर इत्यस्य उद्घाटनम् अकरोत् - अश्विनी वैष्णवः

3 हिमाचलप्रदेशस्य पञ्चायत-निर्वाचनाय सीमाङ्कनकार्यक्रमः प्रकाशितः, ३१ मार्चपर्यन्तम् आरक्षण-आरक्षण- क्रमावलीप्रकाशिष्यते

5 बालानां परीक्षाकाले अवसादसमस्या : समाधानानि च (परीक्षाविशेषः)

## सुभाषितम्

**उदये सविता रक्तो,**
**रक्तश्चास्तमये तथा।**
**सम्पत्तौ च विपत्तौ च,**
**महतामेकरूपता॥**

जिस प्रकार उदय के समय सूर्य रक्त (लाल) होता है और अस्त के समय भी रक्त (लाल) होता है, उसी प्रकार सज्जन व्यक्ति (महापुरुष) सुख (अच्छे समय) और दुःख (बुरे समय) में समान रहते हैं।

## नवदेहल्याम् इण्डिया-ए.आई. इम्पैक्ट-शिखरसम्मेलनावधौ प्रधानमन्त्रिणा नरेन्द्रमोदिना अनेकैः विश्वनेतृभिः सह द्वैपाक्षिकोपवेशनं विहितम्



**हिमसंस्कृतवार्ताः** - नवदेहल्याम् इण्डिया-ए. आई. इम्पैक्ट शिखरसम्मेलनावधौ प्रधानमन्त्रिणा नरेन्द्रमोदिना विश्वनेतृभिः सह द्वैपाक्षिकं मेलनं कृतम्। हैदराबाद-भवने स्पेन-देशस्य राष्ट्रपतिना पेड्रो सान्चेज् इत्यनेन सह प्रधानमन्त्री मेलनं कृतवान्। भारत-स्पेन-देशयोः मध्ये सहभागित्वस्य गहनतायाः विविधेषु विषयेषु चर्चा अभवत्। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् चर्चितेषु प्रमुखेषु क्षेत्रेषु व्यापारः अर्थव्यवस्था, नवान्वेषणम्, स्वास्थ्यं, ऋतुदशा-क्रिया, शिक्षा इत्यादीनि क्षेत्राणि अन्तर्भवन्ति। भारत-यूरोपीयसङ्घयोः दृढसम्बन्धेषु स्पेन-देशः निरन्तरं समर्थनं प्रधानमन्त्रिणा मोदिना प्रशंसितम् । सामाजिकान्तर्जालीये सन्देशे श्रीमोदी अवदत् यत् तौ भारत-स्पेन मैत्रीम्, विशेषतः रक्षा, सुरक्षा, प्रौद्योगिकी इत्यादिषु क्षेत्रेषु चर्चितवन्तौ। प्रधानमन्त्री फिनलैण्ड-देशस्य प्रधानमन्त्री एट्टी पेटेरी ओर्पो इत्यनेन सह अपि वार्तालापम् अकरोत्। तौ सुस्थिरता तथा डिजिटलीकरणम्, ए. आई. अनुसंधानं तथा नैतिक-नवान्वेषणं तथा भारतीयप्रतिभा द्वैपाक्षिकसहयोगं कथं सुदृढं कर्तुं शक्नोति इत्यस्मिन् विषये चर्चितवन्तौ । प्रधानमन्त्रिणा, ए.आई. इत्यस्मिन् क्षेत्रे उदयोन्मुख-नवान्वेषण-क्रीडकेण फिन्लेण्ड्-देशस्य प्रयत्नानां प्रशंसा कृता। प्रधानमन्त्री अवदत् यत्, भारत-फिन्लेण्ड्-देशयोः व्यापारः द्विगुणी कर्तुं लक्ष्यम् अस्ति, येन आर्थिकसम्बन्धान् प्रबलतया प्रवर्धयितुं शक्यते। 6जी, नवान्वेषणम्, स्वच्छ-ऊर्जा, जैव-इन्धनम्, वृत्तीय अर्थव्यवस्था इत्यादिषु भविष्यकालीक-प्रौद्योगिकीषु सहयोगं वर्धयितुं अपि उभौ चर्चितवन्तौ। शिखरसम्मेलनावधौ श्रीमोदी सर्बिया-देशस्य राष्ट्रपतिना अलेक्जेण्डर वुसिक इत्यनेन सह अपि मेलनम् अकरोत्। श्रीमोदी क्रोएशिया देशस्य प्रधानमन्त्रिणा आन्द्रेज प्लेन्कोविक् इत्यनेन सहापि द्वैपाक्षिकं वार्तालापं कृतवान्। षड्विंशत्यधिक द्विसहस्रतम वर्षस्य इण्डिया ए. आई इम्पैक्ट सम्मेलनस्य कृते वैश्विकनेतारः नवदेहल्यां निरन्तरं आगच्छन्ति। स्पेन्-देशस्य राष्ट्रपतिः पेड्रो साञ्चेज पेरेज-कास्टेजोनः, सेशेल्स्-देशस्य उपराष्ट्रपतिः सेबेस्टियन पिल्ले, मारीशस-देशस्य प्रधानमन्त्री डा. नवीनचन्द्र रामगुलामः च ए. आई. शिखरसम्मेलनाय राष्ट्रियराजधान्याम् आगतवन्तः। स्लोवाक गणराज्यस्य राष्ट्रपतिः पीटर पेलेग्रीनी, नेदरलैण्ड-देशस्य प्रधानमन्त्री डिक शूफः, कज़ाकिस्तान-देशस्य प्रधानमन्त्री ओल्ज़ास बेक्टेनोवः चापि ए. आई. शिखरसम्मेलनाय राष्ट्रियराजधान्याम् आगतवन्तः सन्ति।

## निर्वाचनायोगेन दशराज्याणां राज्यसभायाः सप्तत्रिंशत् आसनानां कृते निर्वाचन-कार्यक्रमस्य घोषणा कृता; आगामि मासस्य षोडश-दिनाङ्के मतदानं भविष्यति

**हिमसंस्कृतवार्ताः** - निर्वाचनायोगेन दश राज्याणां सप्तत्रिंशत् राज्यसभासदस्यानां निर्वाचनस्य घोषणा कृता। अस्य मासस्य षड्विंशतिः दिनाङ्के निर्वाचनस्य सूचना प्रकाशिता भविष्यति, अपि च मार्च-मासस्य पञ्च-दिनाङ्कपर्यन्तं नामाङ्कनं कर्तुं शक्यते। मार्च-मासस्य षोडश-दिनाङ्के मतदानं भविष्यति। केन्द्रीयमन्त्री रामनाथ ठाकुरः, राज्यसभायाः उपसभापतिः हरिवंशः, एन.सी.पी.-एस.पी. नेता शरद् पवारः चेत्यादयः अपि तेषु जनेषु सन्ति येषाम् उच्चसदनस्य कार्यावधिं समाप्यन्ते।

## जम्मू-कश्मीर-प्रदेशे उपराज्यपालः मनोज सिन्हा शङ्कराचार्य-मन्दिरस्य शिलान्यासं कृतवान्



**हिमसंस्कृतवार्ताः** - जम्मू-कश्मीर-प्रदेशे उपराज्यपालः मनोज सिन्हा कटरा-नगरे शङ्कराचार्य-मन्दिरस्य शिलान्यासं कृतवान्। एतत् तीर्थ-नगरस्य धार्मिक-आध्यात्मिक संरचनायाः महत्वपूर्णमङ्ग संवर्धनं चास्ति । प्राप्तसूचनानुसारम् अस्मिन् समारोहे वैदिक-मन्त्र-पाठेन सह पारम्परिक विधिना शिलान्यास कार्यक्रमः सम्पन्नः, यत्र वरिष्ठ अधिकारिणः, तीर्थ-समितेः सदस्याः, धार्मिक-नेतारः भक्तजनाश्च उपस्थिताः आसन्।

## जे. पी. नड्डा ब्राजील-देशस्य स्वास्थ्य-मन्त्रिणा अलेक्सान्द्रे पदिल्हा इत्यनेन सह मन्त्रणोपवेशनं कृतवान्

**हिमसंस्कृतवार्ताः** - स्वास्थ्य-परिवार-कल्याण-मन्त्री जे. पी. नड्डा नवदेहल्यां भारत-ए.आइ. प्रभाव-शिखर-सम्मेलनस्य अवसरे ब्राजील-देशस्य स्वास्थ्य-मन्त्रिणा अलेक्सान्द्रे पदिल्हा इत्यनेन सह मन्त्रणोपवेशनं कृतवान्। सामाजिक-माध्यमेषु प्रकाशिते सन्देशे स्वास्थ्य-मन्त्रालयेन उक्तं यत् उभयोः पक्षयोः सुलभ-स्वास्थ्य-सेवायाः उन्नयन-विषयेऽपि चर्चा जाता। अस्मिन् अवसरे औषध-उत्पाद-नियमनेषु तथा डिजिटल स्वास्थ्य-क्षेत्रे सहकार-विषयेषु अपि विमर्शः जातः। अस्मिन् अवसरे नड्डा-महोदयेन ब्राजील-स्वास्थ्य-मन्त्रिणे ब्रिक्स-स्वास्थ्य-मन्त्रि-सम्मेलनार्थम् आमन्त्रणं प्रदत्तम्। एतदतिरिक्तं फ्रान्स-देशस्य राष्ट्रपतिः इम्मैनुअल मैक्रों तथा केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री जगत प्रकाश नड्डाः च नवदेहल्याम् अखिल-भारतीय-आयुर्विज्ञान-संस्थाने वैश्विक स्वास्थ्ये ए. आई. विषये इण्डो-फ्रेञ्च्-परिसरस्य उद्घाटनम् अकुर्वताम्। अयं उपक्रमः वैश्विक स्वास्थ्याय आर्टिफिसियल्-इन्टेलिजेन्स् इत्यस्मिन् क्षेत्रे भारत-फ्रान्स्-देशयोः सहयोगस्य निर्माणे महत्त्वपूर्ण पदाक्षेपं प्रदर्शयति। वैश्विक स्वास्थ्ये ए. आई. विषये इण्डो-फ्रेञ्च्-परिसरस्य उद्देश्यं, ए. आई.-नियन्त्रित-स्वास्थ्य-सेवा-उपायेषु अनुसंधानं, नवान्वेषणम्, अन्ताराष्ट्रिय सहभागितां च प्रवर्धनम् अस्ति।




## महाराष्ट्र-सर्वकारेण मुस्लिम-समुदायस्य जनानां कृते कार्येषु शिक्षासु च पञ्च-प्रतिशतं आरक्षणं निरस्तम्

**हिमसंस्कृतवार्ताः** - महाराष्ट्र-सर्वकारेण मुस्लिम समुदायस्य जनानां कृते कार्येषु शिक्षासु च पञ्च-प्रतिशतं आरक्षणं निरस्तम्। सर्वकारीय-प्रस्तावः प्रख्यापितः यस्मिन् पञ्च-प्रतिशत आरक्षणं प्रदीयमानः पूर्व-अध्यादेशः व्यपगतः, न्यायालयेन च निर्णयस्य अन्तरीम स्थगनम् अस्थाप्यत। पूर्व काङ्ग्रेस्-एन्.सी.पी. सर्वकारेण मराठानां कृते षोडश-प्रतिशतं, मुस्लिम् जनानां कृते पञ्च-प्रतिशतं च आरक्षणं प्रदातुं अध्यादेशः घोषितः आसीत्। नूतनस्य प्रस्तावस्यानुसारं, विशिष्ट-वंचितवर्गे (ए) समाविष्टानां सामाजिक-शैक्षणिक-वंचितवर्गे (ए) मुस्लिम्-समूहस्य च कृते सर्वकारीय-अर्ध-सर्वकारीय-कार्येषु, शैक्षणिकसंस्थासु च पञ्च-प्रतिशत आरक्षणसम्बद्धानि पूर्वतन-सर्वाणि निर्णयानि अध्यादेशाः च निरस्ताः।

# हिमालचे भारते च विश्वस्तरीयाधारभूतसंरचना-निर्माणाय प्रतिबद्धः मोदी-सर्वकारः - अनुरागठाकुरः



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** पूर्वकेन्द्रीयमन्त्री हमीरपुर-संसदीयक्षेत्रस्य सांसदः च अनुरागसिंहठाकुरः अवदत् यत् मोदी-सर्वकारः भारते हिमाचले च विश्वस्तरीयाधारभूतसंरचनानिर्माणाय प्रतिबद्धः वर्तते। २०२६-२७ वर्षस्य आयव्ययके (बजट्) देशे देवभूमौ च आधारभूतसंरचनायाः सुदृढीकरणस्य विशेषं ध्यानं स्थापितम् अस्ति। सः उक्तवान् यत् मोदी-सर्वकारेण २०२६-२७ वर्षस्य आयव्ययके विश्वस्तरीयाधारभूतसंरचनानिर्माणं प्रति स्वकीया अखण्डा प्रतिबद्धता दर्शिता, यस्मिन् उच्चमार्गाणां (Highways), रेलमार्गाणां, सामरिक-सम्पर्क-मार्गाणां (Strategic Connectivity Corridors) तथा सम्पूर्णदेशे 'लॉजिस्टिक्स' जालस्य (Network) सुदृढीकरणाय निरन्तरं निवेशः कृतः अस्ति। पूंजीगतव्यये (Capital Expenditure) तथा सम्पर्कविस्तारे निरन्तरं बलं, विशेषतः हिमाचलप्रदेशसदृशेषु पर्वतीयेषु सीमावर्तिराज्येषु च आर्थिकविकासं सुदृढं कुर्वन् रोजगारस्य अवसरान् सृजति।

विगतेषु १२ वर्षेषु हिमाचलप्रदेशाय केन्द्रात् कर-हस्तान्तरणस्य (Tax Transfer), अनुदानसाहाय्यस्य तथा समर्पितपूँजीनिवेशसाहाय्यस्य माध्यमेन महत्वपूर्णं वित्तीयम् आधारभूतसंरचनात्मकं च समर्थनं मिलितम् अस्ति। वित्तीयवर्षाय २०२६-२७ इत्यस्य कृते हिमाचलप्रदेशाय कर-हस्तान्तरणस्य अन्तर्गतं १३,९४९ कोटिरूप्यकाणि आबंटितानि सन्ति, यदा तु बहुषु केन्द्रपोषित-आधारभूतसंरचना-कार्यक्रमेषु पर्याप्तं साहाय्यं प्रचलति। गते दशके हिमाचलप्रदेशाय 'कर-प्रत्यायोजन' (Tax Devolution) माध्यमेन प्रायः ₹७६,७९९ कोटिरूप्यकाणि तथा अनुदानसाहाय्यरूपेण १.४१ लक्षकोटि-तः अधिकं धनं प्राप्तम् अस्ति, यत् राज्यस्य विकासं प्रति केन्द्रस्य निरन्तरां प्रतिबद्धतां दर्शयति।

# विधायक-निधि-विषये सत्तापक्षस्य उपरि आक्रमणशीला भाजपा; मुख्यमन्त्री उक्तवान्- विकासकार्येषु न भविष्यति कोऽपि अवरोधः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-विधानसभायां बुधवासरे विधायक-निधिः विमुक्ता न जाता इति विषये महान् कोलाहलः दृष्टः। विपक्षः सर्वकारस्य उपरि विकासकार्याणां बाधनस्य आरोपं कृतवान्, ततः सत्तापक्षेण अपि प्रत्युत्तरं दत्त्वा स्थितिः स्पष्टीकृता। सदने विधायक-क्षेत्र-विकास-निधि-विषये सञ्जातायां चर्चायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः सदनम् आश्वासितवान् यत् १.१० कोटिरूप्यकाणां विधायक-निधिः वर्तमान-बजट-सत्रस्य अस्ति, एषा च ३१ मार्च दिनाङ्कात् पूर्वं सर्वथा विमुक्ता भविष्यति।

सः अवदत् यत् सर्वकारः कस्यापि क्षेत्रस्य विकासकार्येषु बाधां न जनयिष्यति। मुख्यमन्त्रिणा स्पष्टीकृतं यत् एषा राशिः वर्तमान-वित्तीयवर्षस्य अन्तर्गतं स्वीकृता अस्ति, प्रक्रमानुसारं च निश्चितावधौ निर्गमिष्यति। आगामि-अप्रैल-मासस्य प्रथमदिनाङ्कतः आरभ्यमाणस्य नूतन-वित्तीयवर्षस्य विधायक-निधि-विषये सः उक्तवान् यत् अधुना आरडीजी (RDG) स्थगिता जाता अस्ति। एतादृश्यां स्थितौ आगामि-भाग-विषये आर्थिकस्थितेः समीक्षां कृत्वा सर्वदलीयगोष्ठीम् आहूय निर्णयः करिष्यते यत् कियान् राशिः विमोक्तुं शक्यते। प्रति निवेदितवान् यत् सर्वेषां विधायकानां हिताय निधिः विमुक्ता करणीया।



## भाजपा-विधायकस्य प्रकाशराणामहोदयस्य प्रश्नः

हिमाचल-विधानसभायाः बजट-सत्रे प्रश्नकालवेलायां जोगिन्द्रनगरस्य भाजपा-विधायकेन प्रकाशराणा महोदेन विधायक-निधि-विषये पृष्टे प्रश्ने सदने तीक्ष्णा वाक्पटुता दृष्टा। प्रकाशराणा महोदयः अवदत् यत् बजट-मध्ये प्रावधानं सत्यपि निधिः न दीयते, येन जनप्रतिनिधीनां विकासकार्याणि बाधितानि भवन्ति। सः उक्तवान् यत् विधायकः जनतायाः लघु-बृहद्-आवश्यकतानां पूर्तये उत्तरदायी भवति। यदि विधायक-निधिः स्थग्यते, तर्हि जनप्रतिनिधीनां भूमिका शून्या भवति। सः मुख्यमन्त्रिणं

## पारित-बजटस्य रोधनं न उचितम् : जयरामठाकुरः

विपक्षस्य नेता जयरामठाकुरः अनुपूरक-प्रश्नेन (Supplementary Question) उक्तवान् यत् विधानसभायां पारित-बजटस्य प्रावधानानां रोधनं सर्वथा अनुचितम् अस्ति। सः ३१ मार्च दिनाङ्कात् पूर्वं द्वयोः लम्बित-भागयोः विमोचनस्य अभ्यर्थनां कृतवान्, येन घोषितानि विकासकार्याणि समयपालनेन पूर्णानि भवेयुः। सः अमुं प्रश्नम् अपि उत्थापितवान् यत् यदि बजटं पारितं जातं, तर्हि तस्य प्रावधानानां लम्बनं संवैधानिक-भावनायाः अनुरूपं नास्ति। अस्मिन् समये सत्तापक्ष-विपक्षयोः मध्ये बहुवारं तीक्ष्ण-टिप्पण्यः अभवन्, येषु विधानसभाध्यक्षेण हस्तक्षेपं कृत्वा सदने व्यवस्थां रक्षितुं प्रार्थना कृता।

# ए.आई. शिखरसम्मेलने वेव्स-क्रियेटरस् कॉर्नर इत्यस्य उद्घाटनम् अकरोत् - अश्विनी वैष्णवः



अश्विनी वैष्णवः इण्डिया ए.आइ इम्पैक्ट्-समिट् इत्यस्य द्वितीये दिने भारतमण्डपे 'WAVES Creators Corners इत्यस्य उद्घाटनमकरोत्। श्री वैष्णवः भारतीय-सृजनात्मक-तन्त्रज्ञान संस्थानस्य अपि प्रशंसामकरोत् यत् सांस्थानमिदं कृत्रिम बुद्धि सृजनात्मक-शिक्षायाम् एकीकृतवान्, येन छात्राः उद्योगस्य परिवर्त्यमान-आवश्यकतानां कृते सज्जाः भवेयुः। मन्त्रीवर्यः WAVES इत्यत्र एकपञ्चाशत् प्रसारमाध्यमानां टेक् स्टार्ट-अप् विजेतृभिः च सह वार्तालापमकरोत्। अवधेयमस्ति यत् अस्मिन् सम्मेलने एकपञ्चाशत् स्टार्ट-अप् इत्येते ए.आई नवान्वेषणानि प्रदर्शयिष्यन्ते । इण्डिया ए.आई. तथा इण्टेल् इण्डिया इत्येताभ्यां संस्थाभ्यां कृत्रिमबुद्धिमत्तायाः उत्तरदायित्व-अभियाने चतुर्विंशतिहोरासु सर्वाधिक प्रतिज्ञा-स्वीकरणस्य श्रेण्यां नूतना विश्वकीर्तिमत्ता स्थापिता। अस्मिन् अभियाने सार्धद्विलक्षाधिकाः छात्राः प्रतिज्ञां स्वीकृतवन्तः। इलेक्ट्रॉनिक्स तथा सूचना प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः उक्तवान् यत् एतदुपलब्धिः प्रधानमन्त्रिणः नरेन्द्रमोदिनः दृष्टेः प्रतिबिम्बः अस्ति। मन्त्री अवदत् यद् देशेन कृत्रिमबुद्धेः चिन्तन-प्रक्रियायाम् उत्तरदायितायाः नेतृत्वं कर्तव्यम्। अस्मिन् अवसरे मन्त्रिणा समग्र दलस्य अभिनन्दनं कृतम् तथा तेभ्यः धन्यवादोऽपि अभिव्यक्तः ।

# कुनो-राष्ट्रीय-उद्याने नूतन-शावकानां जन्म

## भारते चीता-व्याघ्राणां संख्या ३८ (अष्टत्रिंशत्) अभवत्



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।** कुनो-राष्ट्रीय-उद्याने दक्षिण-अफ्रिकादेशस्य 'गामिनी' नाम्ना चीता-व्याघ्रया त्रीन् शावकान् जन्म दत्तवती । अनेन सह भारते चीता-व्याघ्राणां संख्या ३८ (अष्टत्रिंशत्) अभवत्।

**शावकानां संख्या** - केन्द्रीय-पर्यावरणमन्त्री भूपेन्द्र यादवः सामाजिक-माध्यमेन सूचितवान् यत् भारते जन्मप्राप्तानां जीवित-शावकानां संख्या इदानीं २७ (सप्तविंशतिः) संजाता।

**नवमं प्रसवम्** - भारतीय-धरायां चीता-व्याघ्राणां अयं नवमः सफलः प्रसवः अस्ति।

**गामिनी द्विवारं माता** - मन्त्रिणा उक्तं यत् गामिनी द्वितीयवारं शावकान् जन्म दत्तवती। सः अवदत् यत् प्रत्येकः सफलः प्रसवः 'प्रोजेक्ट चीता' इति अभियानं सुदृढं करोति।

**इतिहासः** - वर्ष २०२२-२३ मध्ये नामीबिया-दक्षिण-अफ्रिकादेशाभ्यां २० (विंशतिः) चीता-व्याघ्राः भारतम् आनीताः। प्रधानमंत्री नरेन्द्रमोदी १७ सितम्बर २०२२ दिनाङ्के प्रथमवारं अष्टौ चीता-व्याघ्रान् वने मुक्तवान्। इयं उपलब्धिः भारतस्य वन्यजीव-संरक्षण-प्रयासेषु एकं महत्त्वपूर्णं सोपानम् अस्ति।

# Chamba News - पाङ्गी-क्षेत्रे ऐतिहासिकस्य जुकारू-उत्सवस्य आरम्भः, परितः 'तकड़ा थिया न' इति नादः गुञ्जितः!




**हिमसंस्कृतवार्ताः - शिमला।** चम्बा-जनपदस्य जनजातीयक्षेत्रे पाङ्गी-उपत्यकायां पञ्चदशदिवसीयस्य जुकारू-उत्सवस्य आरम्भः बुधवासरे जातः। पाङ्गी-जुकारू-उत्सवः परस्पर-भ्रातृभावस्य प्रतीकः मन्यते। मङ्गलवासरे मध्यरात्रौ उपत्यकायाः जनाः स्वकीयानां गृहाणां भित्तिषु बलीराजस्य चित्रं निर्माय तस्य प्राणप्रतिष्ठां कृतवन्तः। इतः पूर्वं 'पङ्गवाल'-समुदायस्य जनाः स्वगृहाणां लेपनं अकुर्वन्। सायङ्काले गृहस्वामी 'भरेस-भङ्गी' इति अन्नस्य पिष्टेन बकरूपि-प्रतिमाः निर्माति। एतासां निर्माणकाले कोऽपि केनापि सह वार्तालापं न करोति। पूजा-सामग्री पृथक्कोष्ठे स्थाप्यते। प्रातः प्रायः त्रिवादने गङ्गाजलस्य सेचनेन विशेषपूजया च राज्ञः बलेः प्राणप्रतिष्ठा कृता। ततः परं पञ्चदशदिनानि यावत् पाङ्गी-वासिनः बलीराजस्य पूजां करिष्यन्ति। बलीराजस्य पुरतः 'चौका' (मण्डपम्) निर्मीयते। गोमूत्र-गङ्गाजलानां सेचनानन्तरं गोधूम-यवयोः सक्तुभिः (सत्तू) मण्डपं लिख्यते, यत् पङ्गवाली-भाषायां 'चौका' इति उच्यते।

मण्डपस्य पुरतः भित्तौ बलीराजस्य मूर्तिः स्थाप्यते, या स्थानीयायां भाषायां 'जन बलदानों राजा' इति कथ्यते। पिष्टेन निर्मिताः अज-मेषादयः तृणानां साहाय्येन मण्डपे स्थाप्यन्ते। उपत्यकायाः निवासिनः एतान् राज्ञे बलये अर्पयिष्यन्ति। पञ्चदशदिनानि यावत् केवलं बलीराजस्यैव पूजा भविष्यति, अस्मिन् काले कुलदेवतादीनां अन्येषां देवानां च पूजा न क्रियते। अद्य जनाः परस्परं गृहाणि गत्वा ज्येष्ठानाम् आशीर्वादं गृह्णन्ति, यत् 'पड़ीद' इति उच्यते।

### किं वर्तते पाङ्गी-क्षेत्रस्य जुकारू-उत्सवः?

बुधवासरे ब्रह्ममुहूर्ते उपत्यकायाः जनाः स्नानादिकं कृत्वा श्रद्धया राज्ञः बलेः पुरतः नतमस्तकाः भवन्ति। तदनन्तरं कनिष्ठाः ज्येष्ठानां चरणवन्दनां कुर्वन्ति, ज्येष्ठाश्च स्नेहपूर्वकं तान् आश्रिषन्ति। पूजार्थं पनघटतः (जलाशयतः) पवित्रजलमानीयते जलदेवस्य च विधिवत् पूजा क्रियते। अस्मिन् दिने गृहस्वामी गोमातुः पूजां करोति, या सुखसमृद्धेः प्रतीका मन्यते।

एषः उत्सवः केवलं पूजापर्यन्तं सीमितः नास्ति, अपितु सामाजिक-मेलनाय अपि अस्ति। हिमेन ये जनाः दीर्घकालं यावत् गृहेषु सिद्धाः आसन्, ते अधुना ऋतुपरिवर्तनेन सह परस्परं मेलितुं निर्गच्छन्ति। जनाः परस्परं कण्ठाश्लेषं कुर्वन्ति। मिलनकाले ते प्रेमपूर्वकं वदन्ति – "तकड़ा थिया न" (कुशलं खलु?), विदाकाले च वदन्ति – "मठे मठे विश" (मन्दं मन्दं गच्छ)। प्रथमं ज्येष्ठभ्रातुः गृहं गत्वा ततः अन्यसम्बन्धिनां मेलनस्य परम्परा वर्तते।

### माङ्गल-पन्हेई-उवान-उत्सवाः

तृतीयः दिवसः 'माङ्गल' वा 'पन्हेई' इति रूपेण मान्यते। किलाड़-क्षेत्रे 'पन्हेई' तथा साच-क्षेत्रे 'माङ्गल' इति उच्यते। अस्मिन् दिने जनाः भूमिपूजनार्थं निश्चितस्थाने एकत्रिताः भवन्ति। प्रत्येकगृहात् सक्तुः, घृतं, मधु, पिष्टनिर्मिताः अजाः चानीयन्ते। भूमिपूजनस्य अस्मात् उत्सवात् परं पङ्गवाल-जनाः क्षेत्रेषु कृषिकार्यं प्रारभन्ते। एषः उत्सवः 'उवान' वा 'ईवान' इति नाम्नापि प्रसिद्धः। माघ-फाल्गुन मासयोः आयोजिते अस्मिन् उत्सवे 'स्वाङ्ग-नृत्यम्' अपि भवति, यत्र नागदेवस्य कारदारः स्वाङ्ग-रूपं धारयति। दीर्घ-श्मश्रु-मुकुट-जटाभिः सह स्वाङ्गः मेलके नृत्यति।

पङ्गवाल-एकता-मञ्चस्य अध्यक्षः त्रिलोक ठाकुरः सर्वेभ्यः जुकारू-उत्सवस्य शुभाशयाः दत्तवान्। सः अवदत् यत् अयं भ्रातृभावस्य उत्सवः सम्पूर्णे प्रदेशे पङ्गवाल-समुदायेन मान्यते। सः प्रदेशसर्वकारतः आग्रहं कृतवान् यत् पाङ्गी-क्षेत्रस्य अस्य जुकारू-उत्सवस्य कृते 'राज्य-स्तरीय-उत्सवस्य' (State Level Fair) स्तरं प्रदत्तं भवेत्।

# हिमाचलप्रदेशस्य पञ्चायत-निर्वाचनाय सीमाङ्कनकार्यक्रमः प्रकाशितः, ३१ मार्चपर्यन्तम् आरक्षण-आरक्षण- क्रमावलीप्रकाशिष्यते

**हिमसंस्कृतवार्ताः-** शिमला हिमाचलप्रदेशे पञ्चायतीराजसंस्थानां निर्वाचनप्रक्रिया तीव्रतां गता। राज्य- सर्वकारेण बुधवासरे सीमाङ्कनस्य (Delimitation) विस्तृतः कार्यक्रमः प्रकाशितः। प्रकाशित- कार्यक्रमानुसारं २० फरवरी २०२६ पर्यन्तं सीमाङ्कन-प्रस्तावस्य अधिसूचना प्रकाशिता भविष्यति। २७ फरवरी पर्यन्तं सप्तदिनावधौ जनसामान्यात् आपत्तयः परामर्शश्च आमन्त्रिताः भविष्यन्ति।प्राप्त- आपत्तीनाम् आधारेण २ मार्च २०२६ पर्यन्तं सीमाङ्कनस्य प्रारम्भिकप्रकाशनं क्रियते। यदि कस्यचित् पक्षस्य निर्णयेन असहमति भवति तर्हि ११ मार्च २०२६ पर्यन्तं निवेदनं कर्तुं शक्यते। निवेदनप्राप्तेः अनन्तरं मण्डलीय-आयुक्तेन सप्तदिनाभ्यन्तरे श्रवणं क्रियते। पुनर्विचारयाचना निस्तारणानन्तरं २० मार्च २०२६ पर्यन्तं सीमाङ्कनस्य अन्तिमप्रकाशनं भविष्यति।कार्यक्रमानुसारं ३१ मार्च २०२६ पर्यन्तं पञ्चायत- निर्वाचन- क्षेत्राणाम् अन्तिम-आरक्षणक्रमावली प्रकाशितः भविष्यति। आरक्षणक्रमावली प्रकाशनानन्तरं निर्वाचनप्रक्रिया औपचारिकतया प्रवर्तिष्यते। आरक्षणक्रमावली-प्रकाशनात् अनन्तरं राज्य-निर्वाचन-आयोगः निर्वाचनतिथीनां घोषणां कर्तुं शक्नोति।सर्वकारेण पञ्चायतीराज-विभागेन च सर्वेभ्यः जिला- प्रशासन- कर्तृभ्यः निर्देशाः प्रदत्ताः यत् प्रक्रिया समयबद्धतया पूर्णा क्रियते, यथा सर्वोच्च- न्यायालयस्य आदेशानुसारं निर्वाचनं निर्दिष्ट-समयसीमायां सम्पन्नं भवेत्।प्रदेश-सर्वकारस्य पक्षतः सीमाङ्कन-आरक्षण- प्रक्रियायाः पारदर्शिता विवाद-रहितता च विशेषरूपेण सुनिश्चितीक्रियते। पञ्चायत- प्रतिनिधीनां सम्भावितप्रत्याशिनां च दृष्टिः अधुना ३१ मार्चदिनाङ्के एव निबद्धा अस्ति, यतः आरक्षणक्रमावली- प्रकाशनानन्तरं निर्वाचन- समिकरणानि पूर्णतया स्पष्टानि भविष्यन्ति।

## "लौकिकन्यायकोशः"

## "तुषककण्डन्यायः"

तुष नाम धान्यस्योपरि वर्तमानम् आवरणम्। तुषस्य कतिवारमपि कुट्टनेन किं प्राप्येत? अनावश्यकानां कार्याणां कृते शक्तेः दुरुपयोगः न करणीय इति अनेन न्यायेन बोध्यते। यथा-

**अविचारवतो युक्तिकथनं तुषकण्डनम्।**
**नीचेषूपकृतं राजन् बालुकास्विव मूत्रितम्।।**
{हितोपदेशे ४-१३}

अयं न्यायः पिष्टपेषणन्यायवत् निष्प्रयोजनं कर्म बोधयति। दुष्टस्य कृते कृतः उपदेशः उपकारो वा तुषकण्डन्यायमनुसरति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# मुकेश-अग्निहोत्री उक्तवान्- भाजपा-पक्षेण जलजीवनमिशन-धनराश्या १२ विश्रामगृहाणि निर्मितानि



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेश-विधानसभायाः प्रश्नकालवेलायां प्रदेशस्य उपमुख्यमन्त्रिणा महान् पटाक्षेपः कृतः अस्ति। सः अवदत् यत् पूर्वतनसर्वकारस्य काले 'जलजीवनमिशन' इत्यस्य धनराश्या धर्मपुर-विधानसभाक्षेत्रे १२ विश्रामगृहाणि (Rest Houses) निर्मितानि सन्ति। एतेषां विश्रामगृहाणां निर्माणे २६ कोटिरूप्यकाणि व्ययितानि, यस्य धनं केन्द्रसर्वकारेण स्थगितम् अस्ति। केन्द्रेण उक्तं यत् एतत् धनं पेयजल-योजनानां कृते आसीत्, न तु विश्रामगृह-निर्माणार्थम्। अस्मिन् विषये धर्मपुर-क्षेत्रस्य काङ्ग्रेस-विधायकेन चन्द्रशेखरेण जलजीवनमिशन-विषये प्रश्नः पृष्टः आसीत्। अस्य उत्तरं यच्छन् उपमुख्यमन्त्री मुकेशअग्निहोत्री महोदयः सदने विस्तृतविवरणं दत्तवान्। सः अवदत् यत् जलजीवनमिशन-अन्तर्गतं केन्द्रेण हिमाचलप्रदेशाय ६३९५ कोटिरूप्यकाणि स्वीकृतानि आसन्, येषु ५१६७ कोटिरूप्यकाणि हिमाचलेन प्राप्तानि। पूर्वतन-भाजपा-सर्वकारेण मिशन-कार्यं पूर्णं न कृत्वा अपि केन्द्राय सूचितं यत् हिमाचले मिशनं पूर्णं जातम्। अस्य कारणेनैव जलजीवनमिशनस्य १२०० कोटिरूप्यकाणां राशिः लम्बिता अस्ति।

### केन्द्रसर्वकारेण अस्मात् कारणात् स्थगितं धनम्

उपमुख्यमन्त्री उक्तवान् यत् सत्यं तु एतदस्ति यत् पूर्वतनसर्वकारस्य काले जलजीवनमिशन-अन्तर्गतं आरब्धाः बह्वयः योजनाः अद्यापि अपूर्णाः सन्ति। अस्मिन् विषये बहुवारं केन्द्रीयमन्त्रिणा सह वार्तालापः जातः, परन्तु केन्द्रस्य कथनं वर्तते यत्— "भवद्भिः पूर्वमेव सूचितं यत् मिशनं पूर्णं जातम्, अतः एतत् धनं स्थगितम् अस्ति।"

# पञ्जाबविश्वविद्यालयस्य संस्कृतविभागे
## द्विदिवसीयसंस्कृतशिक्षणकार्यशालायाः सफलसमापनम्

पञ्जाबविश्वविद्यालयस्य संस्कृतविभागे 'संस्कृतमाध्यमेन संस्कृतशिक्षणम्' इति विषये आयोजिता द्विदिवसीयप्रशिक्षणकार्यशाला गतदिने सोत्साहं सम्पन्ना। इयं कार्यशाला संस्कृतभारती (पञ्जाबप्रान्तः) तथा भारतीयभाषासमितिः इत्यनयोः संयुक्ततत्त्वावधाने आयोजिता आसीत्। समापनसत्रस्य शुभारम्भः मङ्गलाचरणेन अतिथिस्वागतेन च अभवत्। कार्यक्रमस्य मुख्यातिथिः पञ्जाबविश्वविद्यालयस्य कुलसचिवः वाई. पी. वर्मा महोदयः आसीत्। विशिष्टातिथिरूपेण संस्कृतभारत्याः उत्तरक्षेत्रसङ्गठनमन्त्री नरेन्द्रमहोदयः उपस्थितः आसीत्। मुख्यवक्तृरूपेण कुलदीपचन्द-अग्निहोत्री महोदयः स्वकीयं विचारं प्रकटितवान्। प्रो. कुलदीप अग्निहोत्री महोदयः स्वबोधने उक्तवान् यत् संस्कृतं केवलम् अतीतस्य भाषा नास्ति, अपितु भारतस्य भविष्यस्य बौद्धिक-आधारशिला अस्ति। सः संस्कृतं व्यावहारिकजीवने स्थापयितुं तथा पारम्परिक-आधुनिकशिक्षणपद्धतीनां समन्वयाय बलं दत्तवान्। विशिष्टातिथिः नरेन्द्रमहोदयः संस्कृतस्य व्यापकप्रचार-प्रसारस्य आवश्यकतां प्रतिपाद्य शिक्षकान् प्रार्थितवान् यत् ते संस्कृतसम्भाषणं समाजस्य प्रत्येकं स्तरं यावत् प्रापयेयुः। मुख्यातिथिः वाई. पी. वर्मा महोदयः विश्वविद्यालयस्तरे भारतीयभाषाणां संरक्षणाय संवर्धनाय च स्वप्रतिबद्धतां प्रकटयन् संस्कृतविभागस्य प्रयासानां भूरि प्रशंसां कृतवान्। अस्मिन् अवसरे प्रतिभागिभ्यः प्रमाणपत्राणि वितरितानि। पञ्जाब-हरियाणा-चण्डीगढ़तः आगतानां शतं (१००) तः



अधिकानां संस्कृतशिक्षकानां सक्रियसहभागितया इयं कार्यशाला अत्यन्तं सफला प्रभाविनी च जाता। कार्यक्रमे संस्कृतविभागस्य प्राध्यापकाः, दयानन्दपीठस्य शोधच्छात्राः च उपस्थिताः आसन्, यैः आयोजनस्य साफल्ये महत्त्वपूर्णा भूमिका निगूढा। विभागाध्यक्षा डॉ. सुनीता देवी सर्वेषाम् अतिथीनां, प्रतिभागिनां सहयोगी-संस्थानां च प्रति कृतज्ञतां ज्ञापयन्ती उक्तवती यत् एतादृशानि आयोजनानि संस्कृतशिक्षणाय नूतनदिशं प्रयच्छन्ति, भविष्येऽपि एतादृशाः शैक्षणिकप्रयासाः निरन्तरं प्रचलिष्यन्ति।कार्यक्रमस्य समापनं डॉ. तोमीरमहोदयस्य धन्यवादज्ञापनेन अभवत्। इयं कार्यशाला संस्कृतशिक्षणस्य सुदृढ़पद्धतेः, संस्कृतसम्भाषणप्रसारस्य तथा भाविकार्ययोजनानिर्धारणस्य दिशि एकं महत्त्वपूर्णं पदं सिद्धम् अभवत्।

## उत्तर प्रदेशस्य अद्यतनीयाः मुख्यवार्ताः)

**ऋतुचक्रम्-** पश्चिम-उत्तरप्रदेशस्य एकोनविंशति (19) जनपदेषु (मेरठ-नोएडा-मुरादाबाद-सहारनपुर इत्यादिषु) अल्पवृष्टेः करकापातस्य च पूर्वसूचना अस्ति। लखनऊ-प्रयागराज-नगरेषु आकाशं स्वच्छं भविष्यति तथा आतपः (धूप) अपि भविष्यति।

**धार्मिकं सांस्कृतिकं च-** अद्य फुलेरा-द्वितीया पर्व अस्ति। मथुराव्रजमण्डलेषु अद्य आरभ्य होली-उत्सवस्य उद्घोषः अभवत्। तत्र राधा-कृष्णयोः सह पुष्पाणां होली क्रीड्यते।

**फिनटेक-एआई केन्द्रम्-** उत्तरप्रदेशसर्वकारः यमुना-एक्सप्रेसवे क्षेत्रे २५० एकड-मिते भूमौ 'फिनटेक पार्क' निर्मास्यति। अपि च ग्रेटर-नोएडा क्षेत्रे भारतस्य प्रथमं 'एआई डेटा सेंटर' विकसिष्यते।

**खाद्यसुरक्षा-** इदानीं प्रदेशस्य जनपदेषु 'मॉडल-राशन-आपणेषु' गोधूम-तण्डुलैः सह अन्यानि जीवनावश्यकवस्तूनि अपि प्राप्स्यन्ते।

**शिक्षा-क्षेत्रम्-** यूपी-बोर्ड परीक्षाः प्रचलन्ति। कौशाम्बी जनपदे हिन्दी-परीक्षायां कश्चन कूट-परीक्षार्थी (फर्जी छात्र) गृहीतः।

**स्वर्ण-रजत मूल्यम्-** उत्तरप्रदेशस्य नगरेषु स्वर्णस्य मूल्यं स्थिरम् अस्ति। २४ कैरेट-स्वर्णस्य मूल्यं प्रायः ₹१,४९,४७० (प्रति १० ग्राम) अस्ति। रजतस्य मूल्ये किञ्चित् न्यूनता जाता।

**राजनीतिः-** सपा-भाजपा दलयोः मध्ये 'जाति-जनगणना' विषये वाग्युद्धं प्रचलति।

**संघप्रमुखस्य लखनऊ-प्रवासः:** राष्ट्रिय-स्वयंसेवक-संघस्य (RSS) सरसङ्घचालकः मोहन भागवतः लखनऊ-नगरे आयोजिते एकस्मिन् कार्यक्रमे उक्तवान् यत् आगामि-काले भारतं 'ग्लोबल साउथ' (वैश्विक-दक्षिण-देशानाम्) नेतृत्वं करिष्यति। सः स्वयंसेवकान् ग्रामीण-विकासार्थं सामाजिक-समरसतायै च कार्यं कर्तुम् आह्वानं कृतवान्।

**यूपी-विधानसभा-सत्रम्-** विधानसभायाम् राज्यपालस्य अभिभाषणे सपा-दलस्य विधायकाः कोलाहलं कृतवन्तः।

# स्वामिभद्रेशदासेन कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य
# सर्वदर्शनविभागीयाध्यापकेभ्यः विशिष्टसम्मानस्य विज्ञापनम्





**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः नलबारी।** असमप्रदेशस्य नलबारी-नगरस्थे कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालय इति ख्यातिप्राप्ते विश्वविद्यालये सर्वदर्शनविभागस्य प्राङ्गणे अत्यन्तगौरवपूर्णः, प्रेरणादायकः च सम्मानसमारोहः भव्यतया सम्पन्नः। सभागारः सुशोभितः आसीत्, वेदघोषैः, मंगलाचरणेन, दीपप्रज्वलनेन च कार्यक्रमस्य शुभारम्भः कृतः। आचार्याः, अनुसन्धानकर्तारः, छात्राः च बहुसंख्यया उपस्थिता आसन्, येन समारोहस्य महत्त्वम् अधिकतया प्रकाशितम्।अस्मिन् पुण्यावसरे सर्वदर्शनविभागस्य अध्यक्षः प्रो० रणजीतकुमारतिवारीमहोदयः, तथा विभागस्य सर्वे आचार्याः — प्रो० उमामहेश्वरी, सुश्री लोपामुद्रागोस्वामी, श्री पुलकउपाध्यायः, सुश्री मयूरीबरकाकती, सुश्री सीमा बर्मन् — एते सर्वे पूज्येन स्वामिभद्रेशदासमहोदयेन सस्नेहम्, सादरं च सम्मानिताः। एषः सम्मानः केवलं व्यक्तिनिष्ठः नासीत्, अपितु समग्रस्य विभागस्य दीर्घकालिकशैक्षणिकपरिश्रमस्य, अनुसन्धानपरम्परायाः, शास्त्रसेवायाः च सार्वजनिकस्वीकृतिरूपेण अभवत्।

पूज्यस्वामिभद्रेशदासमहोदयः, यः स्वामिनारायणसंस्थायाः प्रमुखः विद्वान् च अस्ति, वेदान्तशास्त्रे असाधारणविद्वत्ता विश्वविख्यातः अस्ति। तेन अक्षरपुरुषोत्तमदर्शनस्य प्रतिष्ठापने, विशेषतः प्रस्थानत्रय्याः — उपनिषदः, भगवद्गीता, ब्रह्मसूत्राणि — इत्येषां ग्रन्थानां भाष्यरचनया अद्वितीयं योगदानं कृतम्। तेषां भाष्येषु सूक्ष्मतर्कप्रयोगः, प्रमाणसम्मतव्याख्या, परम्परानुगतभावः च सम्यग् दृश्यते। अतः तेषां कीर्तिः भारतीयदर्शनजगति सुविख्याता अस्ति।समारोहस्य मध्यभागे स्वामिभद्रेशदासमहोदयेन प्रेरणादायिनी व्याख्यानमाला प्रदत्ता। तेन भारतीयदर्शनपरम्परायाः वैशिष्ट्यम्, विविधदर्शनानां परस्परसामञ्जस्यम्, गुरुपरम्परायाः अनिवार्यता, तथा समन्वयदृष्ट्या अध्ययनस्य आवश्यकता इत्यादयः विषयाः गाम्भीर्येण विवेचिताः। तेन उक्तं यत् "दर्शनशास्त्रं केवलं वादविवादस्य विषयः न, अपितु जीवनपरिष्कारस्य, आत्मोन्नतेः, लोककल्याणस्य च साधनम् अस्ति।" तस्य वचनानि श्रोतृणां हृदये गाढप्रभावः विस्तारितः।विशेषतया तेन सर्वदर्शनविभागस्य अध्यापनपद्धतिः, अनुसन्धानपरम्परा, छात्राणां संस्कारनिर्माणे विभागस्य योगदानं च उच्चैः प्रशंसितम्। आचार्याणां शास्त्रनिष्ठा, समयपालनम्, समर्पणभावः, अनुसन्धानशीलता च तेन आदर्शरूपेण निर्दिष्टा। तेन उक्तं यत् एषः विभागः केवलं पाठ्यक्रमपरिसीमितः नास्ति, अपितु भारतीयज्ञानपरम्परायाः जीवितप्रतिनिधिः अस्ति।विशेषतया सुश्री मयूरीबरकाकती, या अध्यापिका, अनुसन्धानकर्त्री च अस्ति, तस्याः अक्षरपुरुषोत्तमदर्शनविषये गम्भीरं शोधकार्यं विशेषतया प्रशंसितम्। स्वामिभद्रेशदासेन तस्याः शोधप्रबन्धस्य अध्यायविन्यासः, तर्कसंगतिः, प्रमाणोपन्यासः, पूर्वपक्ष-सिद्धान्तरचना च सूक्ष्मतया परीक्षिताः। तेन तस्यै आवश्यकाः संशोधनसूचनाः, शास्त्रीयपरिशुद्ध्यर्थं महत्त्वपूर्णाः उपदेशाः च प्रदत्ताः। सहैव तस्याः परिश्रमस्य, मौलिकचिन्तनस्य, वेदान्तपरम्परायां तस्याः योगदानस्य च भूरिशः प्रशंसाः कृताः। एतत् सर्वम् उपस्थितानां छात्राणां कृते महत् प्रेरणास्रोतः अभवत्। समारोहस्य अन्ते विभागीयाचार्यैः स्वामिभद्रेशदासमहोदयाय कृतज्ञताज्ञापनं कृतम्। अध्यक्षमहाशयेन तेषां आगमनं विश्वविद्यालयस्य कृते ऐतिहासिकक्षणरूपेण वर्णितम्।अयं सम्मानसमारोहः सर्वदर्शनविभागस्य कृते न केवलं गौरवस्य विषयः अभवत्, अपितु भाविषु अनुसन्धानकार्येषु, शास्त्रीयसंवादेषु, राष्ट्रिय-अन्ताराष्ट्रियस्तरे प्रतिष्ठावृद्धौ च नूतनप्रेरणायाः स्रोतः अभवत्। एषः कार्यक्रमः विभागस्य शास्त्रीयप्रतिष्ठां दृढीकृतवान्, आचार्याणां मनसि नूतनम् उत्साहं जनितवान्, छात्राणां च जीवनदृष्टौ सकारात्मकपरिवर्तनस्य बीजं रोपितवान् इति सर्वैः अभिप्रेतम्।

# बालानां परीक्षाकाले अवसादसमस्या : समाधानानि च(परीक्षाविशेषः)

✍ डॉ विमलेश झा, डीएवी पब्लिक स्कूल,
बरारी , भागलपुर, बिहार

मानवजीवने शिक्षा परमं साधनं मन्यते। शिक्षया एव बालकः ज्ञानं, विवेकं, संस्कारान्, जीवनकौशलानि च अधिगच्छति। परन्तु आधुनिककाले शिक्षा यत्र बालविकासस्य साधनं भवितव्यम्, तत्र सा परीक्षाकेन्द्रिता, अङ्कप्रधाना च जाता अस्ति। अस्याः प्रवृत्तेः सर्वाधिकं दुष्परिणामं बालानां मनसि दृश्यते। विशेषतः परीक्षाकाले बालानां मनसि यः तीव्रः मानसिककष्टः, चिन्ता, भयः, निराशा च जायते, सः अवसादसमस्यां जनयति।

अवसादः केवलं मानसिकदुर्बलता न, अपि तु गम्भीरः मानसिकः विकारः अस्ति, यः बालस्य चिन्तनं, भावनां, आचरणं, जीवनदृष्टिं च नकारात्मकरूपेण परिवर्तयति। परीक्षाकाले एषा समस्या तीव्रतररूपेण प्रकटिता भवति , यतः बालाः भविष्यस्य सम्पूर्णभारं परीक्षाफलेन सह सम्बद्धं मन्यन्ते। अतः "बालानां परीक्षाकाले अवसादसमस्या" इति विषयः अधुना शिक्षाक्षेत्रे, सामाजिकक्षेत्रे च अत्यन्तं चिन्ताजनकः जातः अस्ति।

अवसादः नाम तादृशी मानसिकी अवस्था वर्तते या निरन्तरं दुःखभावं, आशाहीनतां, आत्मग्लानिं, रुचिहानिं, उत्साहाभावं च उत्पादयति। सामान्यदुःखात् अवसादः भिन्नः अस्ति, यतः एषः दीर्घकालं स्थायीरूपेण मनसि वर्तते। बालानां परीक्षाकाले अवसादः निम्नलक्षणैः प्रकटितो भवति—

निरन्तरं भययुक्ता चिन्ता,आत्मविश्वासस्य तीव्रः क्षयः,"अहं असमर्थः अस्मि" इति भावना,अध्ययनविषये अरुचिः,अनिद्रा अथवा अतिनिद्रा,एकाकीभावः,जीवनविषये निराशा इत्यादीनि लक्षणानि यदि दीर्घकालं यावत् वर्तन्ते, तर्हि बालस्य मानसिकं स्वास्थ्यं गम्भीरतया प्रभावितं भवति।परीक्षाकाले अवसादसमस्यायाः कारणानि

**1.अङ्कप्रधानशिक्षापद्धतिः-**

आधुनिकशिक्षाव्यवस्थायां बालस्य सम्पूर्णमूल्यांकनं अङ्कैः एव क्रियते। "अधिकाङ्काः = सफलजीवनम्" इति मिथ्याधारणा समाजे स्थापिताऽस्ति। अस्याः कारणात् परीक्षाकाले बालाः अत्यधिकं मानसिककष्टम् अनुभवन्ति, यः शनैः शनैः अवसादरूपेण परिवर्तते।

**2. अभिभावकानां अतिरिक्ता अपेक्षाः-**

बहवः अभिभावकाः स्वकीयाः अपूर्णाः स्वप्नाः बालानां माध्यमेन पूरयितुं प्रयतन्ते। "त्वया प्रथमस्थानम् एव भवितव्यम्", "नवति प्रतिशतं अपेक्षितम्" इत्यादीनि वाक्यानि बालमनसि गम्भीरं भयम् उत्पादयन्ति। अपेक्षानां पूर्त्यभावे बालः स्वं दोषी मन्यते, येन अवसादः उत्पद्यते।

**3. सामाजिकतुलना तथा प्रतिस्पर्धा-**

समाजे, विद्यालये, परिवारमध्ये च बालानां निरन्तरं तुलना क्रियते। "अमुकः अधिकाङ्कान् प्राप्नोत्", "त्वं किमर्थं न्यूनाङ्कान् प्राप्नोसि?" इत्यादयः प्रश्नाः बालस्य आत्मसम्मानं नाशयन्ति। परीक्षाकाले एषा तुलना अधिकतीव्रा भवति।

**4. परीक्षाभयम् असफलताभयं च-**

परीक्षा केवलं ज्ञानपरीक्षणं न भवति, अपि तु बालानां दृष्ट्या जीवनस्य निर्णायकपरीक्षा इव भवति। असफलताभयः बालान् निरन्तरं पीडयति। "यदि अहं असफलो भविष्यामि, तर्हि मम जीवनं नष्टं भविष्यति" इति चिन्ता अवसादस्य मूलं भवति।

**5. विश्रान्तेः क्रीडायाः च अभावः-**

परीक्षाकाले बालाः दीर्घकालं पुस्तकेषु निमग्नाः भवन्ति। क्रीडा, मनोरञ्जनं, मित्रसंवादः, स्वच्छन्दचिन्तनं च सर्वं त्यक्तं भवति। एतेषां अभावः मानसिकसन्तुलनं भङ्क्त्वा अवसादं जनयति।

**6. शिक्षकाणां कठोरवृत्तिः-**

केषुचित् विद्यालयेषु शिक्षकाः परिणामप्रधानदृष्ट्या बालान् अनुशासयन्ति। भयप्रदर्शनं, दण्डः, निरन्तरपरीक्षाः च बालानां मानसिककष्टं वर्धयन्ति।

## परीक्षाकाले अवसादसमस्यायाः दुष्परिणामाः

**1. मानसिकस्वास्थ्यस्य गम्भीरा हानिः-**

अवसादग्रस्तः बालः निरन्तरं दुःखी, निराशः, भयभीतः च भवति। सः न आत्मानं, न जीवनं, न भविष्यं सकारात्मकदृष्ट्या पश्यति।

**2. अध्ययनक्षमतायाः ह्रासः-**

यस्य बालस्य मनः अवसादेन ग्रस्तं भवति, सः अध्ययनं कर्तुं समर्थः न भवति। एकाग्रता नश्यति, स्मरणशक्तिः क्षीयते।

**3. आत्मविश्वासस्य पूर्णनाशः-**

परीक्षाकाले अवसादः बालान् आत्महीनतां नयति। तस्य मनसि स्वस्य अयोग्यतायाः, असफलतायाः, निरर्थकतायाःच कृते धारणा च आगच्छति।

**4. शारीरिकस्वास्थ्ये प्रभावः**

मानसिकावसादः- शारीरिकरूपेण अपि प्रकटितो भवति। शिरःशूलः, उदरव्यथा, श्रमव्यथा, अनिद्रा, अजीर्णता इत्यादयः समस्याः जायन्ते।

**5. जीवनविषये नकारात्मकभावना-**

केचन बालाः अवसादस्य तीव्रतया जीवनं भाररूपेण अनुभवन्ति। एषा अवस्था समाजाय अत्यन्तं चिन्ताजनका अस्ति।

## परीक्षाकाले अवसादसमस्यायाः समाधानानि

**1. शिक्षाव्यवस्थायाः मानवीकरणम्-**

शिक्षा भयस्य कारणं न, अपि तु आनन्दस्य साधनं भवेत्। परीक्षा केवलं एकं मूल्यांकनसाधनं भवतु, न जीवननिर्णायकं माध्यमम् भवतु।

**2. अभिभावकानां सहानुभूतिपूर्णा भूमिका-**

अभिभावकैः बालानां भावनाः अवगन्तव्याः। अङ्कानाम् अपेक्षया प्रयासस्य, परिश्रमस्य च प्रशंसा करणीया। असफलता अपि शिक्षायाः भागः इति बालान् बोधयितव्यम्।

**3. शिक्षकाणां प्रेरणादायिनी वृत्तिः**

शिक्षकाः भयस्य कारणं न भवेयुः। ते स्नेहपूर्णाः, सहायकाः, मार्गदर्शकाः च भूत्वा बालानां आत्मविश्वासं वर्धयेयुः।

**4.मानसिकस्वास्थ्यशिक्षायाः समावेशः-**

विद्यालयेषु मानसिकस्वास्थ्यविषये जागरूकता आवश्यकं भवति। परामर्शदातृव्यवस्था, योगः, ध्यानम्, प्राणायामः च एते परीक्षाकाले अत्यन्तोपयोगिनः सन्ति।

**5. समयसन्तुलनम्-**

अध्ययनेन सह क्रीडा, विश्रान्तिः, मनोरञ्जनं च आवश्यकं भवति। संतुलितजीवनशैली अवसादं निवारयति।

**6. समाजस्य दृष्टिकोणपरिवर्तनम्-**

समाजेन अङ्कपूजां त्यक्त्वा व्यक्तित्वविकासः सम्माननीयः। सर्वे बालाः समानाः न भवन्ति। एतत् सत्यं सर्वैः स्वीकरणीयः।

बालानां जीवनं कोमलं, भावुकं, आशापूर्णं च भवति। परीक्षाकाले उत्पन्नः अवसादः तस्य कोमलतां नाशयति। शिक्षा यदि भययुक्ता भविष्यति, तर्हि सा बालविनाशस्य कारणं भविष्यति। अतः अभिभावकाः, शिक्षकाः, शिक्षाप्रशासनं, समाजः च संयुक्तरूपेण प्रयासं कुर्वन्तु, येन बालाः परीक्षाकाले अवसादमुक्ताः भूत्वा आत्मविश्वासेन जीवनपथे अग्रसराः भवितुं शक्नुवन्ति।

न अङ्काः, न परीक्षा अपि तु बालस्य मानसिकस्वास्थ्यं, आनन्दः,सर्वाङ्गीणविकासः एव शिक्षायाः परमलक्ष्यं भवेत्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# श्रीभगवत्कृपाशक्तिः

ईश्वरप्रार्थनायां विशेषतया कृपाशक्तिः तिष्ठति। मनुष्यस्य अन्तःकरणे स्थितं शोक- चिन्ता- क्लेशादिकं प्रार्थनायाः सत्प्रभावतो दूरं गच्छति। शनैः अन्तःकरणे प्रसन्नता वर्धते, शान्तेरनुभवो भवति। सेवाकार्यादिभावो मनसि उत्पद्यते, तदर्थञ्च प्रेरणा प्राप्यते। जीवने कृतं कर्म सफलतां गच्छति। तस्मात् नियमितरूपेण प्रतिदिनं मनुष्येण भगवत्प्रार्थना कर्तव्या। हे परमसखे! श्रीकृष्ण! हे अच्युत भगवन्! श्रीलक्ष्मीदेव्याः करकमलाभ्यां सेवितस्य भवतः चरणारविन्दस्य शरणं प्रति आगतम् एवं भयङ्करे भवसागरे निमज्जितं मां कृपया उद्धर। त्रिगुणमय्या मायारूपिण्या मृगतृष्णया यस्य बुद्धिः नितरां चापल्यं गतास्ति, यस्य दशेन्द्रियाणि विषयभोगार्थम् उत्कण्ठितानि सन्ति, यो दुष्टमनुष्यैः अपमानितः स्यात्, मृतवत् स्वबुद्ध्याः कारणतो येन भगवच्छरणमपि त्यक्त्वा सांसारिकगुणानां शरणं गृहीतमस्ति, यः सदैव भयभीतः, कामादिषट्शत्रूणां जाले निपतितः 'त्राहि त्राहि' इत्युच्चारयन् भ्रममाणः स्यात्, स नान्यः कोऽपि, अपि तु अहमेवास्मि। हे प्रभो! कालिन्द्याः प्राणनाथः त्वमसि, परन्तु तव चरणारविन्दपरागेण सर्वथा शून्यः अस्म्यहम्। मनश्शोकस्य, बुद्धिभ्रमस्य च नाशार्थं समागतः अजन्माः त्वमेव असि। तव मुखकमलस्य दर्शनाभिलाषिणं, लक्ष्म्याः करकमलाभ्यां सेवितस्य तव चरणकमलस्य शरणं प्रति आगतं मां कृपया उद्धर। कालिन्दी, रुक्मिणी, राधा, सत्यभामा, जाम्बवती इत्येतासां सुहृद् त्वमेव असि, एवं स्वशरणागतानां भक्तानामुपरि कृपां कृत्वा तेषां भवभयाद् विमोचकः, वरदः, गोपबालानां प्रियतमः, रासक्रीडायाः अधिनायकः, गोवर्धनधारी, मधुसूदनः, सर्वेश्वरः, अत्यन्तं कमनीयः, गुणाश्रयः इत्यादिभिः नामभिः, नानासद्गुणैश्च त्वं विभूषितोऽसि, त्वां शिरः अवनमय्य अत्यन्तं श्रद्धया प्रणमाम्यहम्। रे मनः! त्वं सर्वदा यज्ञेश्वरस्य श्रीकृष्णस्य हि भजनं कुरु। हे परमसखे! लक्ष्म्याः करकमलद्वारा सेवितस्य तव चरणारविन्दस्य शरणागतं मामुद्धर, इत्येवम् आर्तो भूत्वा, शरणागतः सन्, लगनतया च सततं भगवत्प्रार्थना करणीया मनुष्येण। एवं भावुकतया, प्रेम्णा, गद्गदतया च कृतां प्रार्थनां भगवान् अवश्यं शृणोति इति विश्वासः। प्रार्थनाशक्तेः वशीभूतो वर्तते सः। तस्मात् स्वभक्तानामुपरि स आशिषा अनुगृह्णाति। स आशीर्वादो हि प्रार्थनाशक्तितः प्राप्तः परिणामभूतो विषयः। तस्माद् भगवत्कृपाशक्तिः अनुपमा, अनिर्वचनीया चेति, शुभमस्तु।

# वार्ता-संवादः-

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। श्रूयताम्, पर्वतीय-प्रदेशे एकः विचित्रः न्यायः जातः।

केचन कोलाहलं कुर्वाणाः द्विचक्रिका-चालकाः स्थानीयजनैः दण्डिताः। तैः चालकैः स्व-यानानां तीव्र-ध्वनिः बलात् श्रुतः।

**नन्दिनी-** एतत् तु अति-उत्तमम्। ध्वनि-प्रदूषणं न करणीयम् एव।

अन्यत् शृणु, चीन-देशे एका भिन्ना घटना भूता। तत्र पानागारे वैद्येन नाडी-परीक्षा कृता, ततः एव औषधियुक्तं पानं दत्तम्।

**काव्या-** अहो, मदिरालये अपि स्वास्थ्य-चिन्तनं कृतम्! आश्चर्यम्। परं तन्त्रज्ञानस्य विषयः अपि अस्ति। सिंहपुरराजदूतेन नूतनवर्षस्य शुभकामना प्रेषिता। सा शुभकामना कृत्रिम-बुद्ध्या (AI) निर्मितेन चलच्चित्रेण ज्ञापिता। **नन्दिनी-** सुन्दरं खलु। तन्त्रज्ञानं सर्वत्र प्रविशति। परं "रोबर्ट" नामकेन लेखकेन विपणि-पतनस्य विषये भीतिः दर्शिता। तेन सुवर्णं रजतं च क्रेतव्यम् इति उक्तम्।

**काव्या-** अर्थ-विषये अवधानं आवश्यकम्। अस्तु, श्वः मिलावः।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः